Babu Banarsiprasad, Ed.
Mathuripanchalakshmanitippanam-
kalishankari
माथुरी पंचलक्षणी टिप्पणं कालीशंकरी
Sanskrit
Page - Printed
1931 sambat (145 years old)
6 Folio
12" x 5.2"
Complete

॥ अथमाथुरीपंचलक्षणीटिप्पणंकालीशंकरीलिख्यते॥

म॰थु॰टी॰ ॥श्रीगणेशायनमः॥साध्यतावच्छेदकसंबंधावच्छिन्न साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभाववृत्तिसाध्यसामान्यीयप्रति॰
१ योगितावच्छेदकसंबंधेनसाध्याभाववत्त्वंविवक्षितंमथुरानाथेन।अथात्रसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकाभाववृत्तिइत्येवा॰
स्तां।किंसाध्यतावच्छेदकावच्छिन्नइत्यनेनआत्मत्वप्रकारकप्रमाविशेष्यत्वाभाववान् आत्मत्वादित्यादौआत्मत्वप्रकारकप्रमाविशेष्यत्वा
भावात्मकसाध्यस्यकालिकसंबंधावच्छिन्नप्रतियोगिताकाभावेसाध्यतावच्छेदकीभूतस्वरूपसंबंधावच्छिन्नप्रतियोगिताकत्वाभावादव्या
प्त्यभावादितिचेन्न।तादृशाभावस्यापिसमवायादिसंबंधावच्छिन्नप्रतियोगिताकप्रमेयाभावनिष्ठस्वरूपसंबंधावच्छिन्नप्रतियोगिता
कत्वात्।नचतथापिसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगितायांसाध्या भावनिष्ठस्वरूपनिष्ठत्वनिवेशनेवोक्ताव्याप्तिवारणसंभ
वादलंसाध्यतावच्छेदकावच्छिन्नत्वनिवेशनेतिवाच्यम्॥आत्मत्वविशिष्टप्रमेयत्वावच्छिन्नस्वरूपसंबंधावच्छिन्नप्रतियोगिताकाभाव
वृत्तिस्वरूपसंबंधावच्छिन्नप्रतियोगितायाअपितादृशसाध्यनिरूपितत्वात्तदवच्छेदकीभूतस्वरूपसंबंधेनात्मत्वप्रकारकप्रमाविशेष्य
त्वस्वरूपसाध्याभावस्यात्मनिसत्त्वादुक्ताव्याप्तितादवस्थ्यात् साधतावच्छेदकावच्छिन्नत्वनिवेशेच आत्मत्वविशिष्टप्रमेयत्वावच्छिन्ना
भावस्यसाध्यतावच्छेदकीभूतात्मत्वप्रकारकप्रमाविशेष्यत्वाभावत्वावच्छिन्नंप्रतियोगिताकत्वविरहान्नाव्याप्त्यवकाशइति नचैवमपिका
लिकसंबंधावच्छिन्ननिरवच्छिन्नाधिकरणत्वाप्रसिद्ध्याव्याप्तितादवस्थ्यमितिवाच्यंनिरवच्छिन्नत्वपदेननिरवच्छिन्नवृत्त्यनियामक
संबंधानवच्छिन्नत्वावच्छिन्नत्वा भयाभाववत्त्वस्यविवक्षितत्वात्॥कालिकसंबंधावच्छिन्नाधिकरणतायांनिरवच्छिन्नवृत्त्यनियाम॰
कसंबंधानवच्छिन्नत्वविरहादवो भयाभावस्याप्रसिद्धत्वात्।कालिकसंबन्धानवच्छिन्नत्वावच्छिन्नत्वोभयाभाववत्त्वनिवेशनैवोप राम
पत्तौअनुगमोव्यर्थइतिचेन्न।दिक्कृतविशेषणताविशेषसंबंधावच्छिन्नप्रतियोगिताकात्मत्वप्रकारकप्रमाविशेष्यत्वाभाववानात्मत्वा १

दिक्त्वादावव्याप्त्यापत्तेः दिक्त्वविशेषणताविशेषसंबंधावच्छिन्ननिरवच्छिन्नाधिकरणत्वाप्रसिद्धेः तादृशसंबन्धावच्छिन्नाधिकरणताया
मुक्तोभयाभाववत्त्वविरहात् अथैवमपिकालिकसंबन्धावच्छिन्नप्रमेयाभावस्यस्वरूपसंबंधेनसाध्यतायामात्मत्वादिहेतावव्याप्तिः
कालिकसंबन्धावच्छिन्नप्रतियोगिताकतादृशप्रमेयाभावाभावस्यातिरिक्तत्वेपिप्रमेयत्वेनतादृशप्रमेयत्वावच्छिन्नस्वरूपसंबंधावच्छि
न्नप्रतियोगिताकाभाववत्तयातन्निष्ठसाध्यीयप्रतियोगितावच्छेदकीभूतस्वरूपसंबंधस्यापिलक्षणघटकतयाहेतुमतिप्रमेयात्मकसा
ध्याभावस्यसत्त्वादितिचेन्न।साध्यतावच्छेदकसंबंधावच्छिन्नइत्यादिवृत्त्यंतेनसाध्यतावच्छेदकावच्छिन्नसाध्यतावच्छेदकसंबंधाव
च्छिन्नप्रतियोगितानिरूपकीभूतानुयोगितावच्छिन्नत्वविवक्षितत्वात् तथाच साध्यतावच्छेदकतादृशप्रमेयाभावत्वावच्छिन्नस्व
रूपसंबंधावच्छिन्नप्रतियोगितानिरूपकत्वस्यप्रमेयाभावीयकालिकसंबंधावच्छिन्नप्रतियोगिताकाभावत्वरूपानुयोगितायामसत्त्वा
त् तादृशप्रमेयाभावत्वावच्छिन्नस्वरूपसंबंधावच्छिन्नप्रतियोगिताकाभावत्वरूपानुयोगितायाएवतन्निरूपकत्वात् तदवच्छिन्नकालि
कसंबंधावच्छिन्नप्रतियोगितायाएवसाध्यनिरूपितत्वात् तदवच्छेदकीभूतकालिकसंबंधेनसाध्याभाववतिकाले आत्मत्वादेरवृत्ति-
त्वान्नोक्ताव्याप्त्यवकाशइतिध्येयं॥१॥साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकसाध्याभाववृत्तिसामान्यीयप्रतियोगितावच्छे-
दकसंबंधेनसाध्याभावाधिकरणंवाच्यं अतोनाभावसाध्यकाव्याप्तिः साध्यसामान्यीयत्वंचयावत्साध्यनिरूपितत्वंस्वानिरूपकसाध्य
कभिन्नत्वमितियावत् तच्चप्रतियोगिताविशेषणंतेनसमवायेनविषयितयाप्रमेयसाध्यकेज्ञानत्वादिहेतौप्रमेयाभावस्यकालिकसंबंधा
वच्छिन्नप्रतियोगिताकोयोभावस्तस्यापिप्रमेयतयातन्निरूपितप्रतियोगितावच्छेदककालिकसंबंधेनसाध्याभावस्वाधिकरणेसत्त्वेपिना
व्याप्तिःसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकाभाववृत्तित्वंप्रतियोगिताविशेषणंतेनात्मत्वप्रकारकप्रमाविशेष्यत्वस्यकालिकसंबंधे

म·टि·सा नाभावस्यस्वरूपसंबंधेनसाध्यत्वेआत्मत्वादिहेतौनाव्याप्तिः।अत्रप्रतियोगितावच्छेदकवत्प्रतियोग्यन्योन्याभावाभावस्तेन तादात्म्ये
२ नघटादेःसाध्यत्वेघटत्वादिहेतौनाव्याप्तिः इत्थंचात्यंताभाववत्वंनिरूपितत्वेनापिप्रतियोगिनाविशेषणीयातेनघटभिन्नघटत्वत्वा
दित्यादौनाव्याप्तिः॥इतिमाथुरी॥अत्रेदमाशंकते।घटभिन्नंकपालत्वादित्यादावव्याप्तिः साध्याभाववृत्तिसाध्यीयप्रतियोगितावच्छेदक
समवायसंबंधेनघटस्वरूपसाध्याभावस्यसाधनाधिकरणेवृत्तेः नचात्रविवक्षणीयसाध्याभावत्वविशिष्टनिरूपिताधिकरणत्वस्यकपा
लेसत्वान्नाव्याप्तिरितिचेन्न यतोघटभेदाधिकरणेविरोधिताघटकसंबंधेनैवघटभेदाभावाधिकरणत्वेनस्वीक्रियते तथाचतादात्म्येनघ
टव्यक्त्यासमंसमवायेनघटव्यक्त्याचसमंविरोधिताघटभेदेनसमंघटभेदाभावस्यसमवायेनैवविरोधितानतुतादात्म्येनानुभवानुरो
धादितितादात्म्येनघटभेदाभाववतिघटत्वेहेतौवृत्तेरव्याप्तिवारणायात्यंताभावत्वनिवेशः घटभेदाभावस्यविरोधिताघटकसमवायेन
कपालेःस्वीकारात् घटभिन्नंकपालत्वादित्यादौनाव्याप्तिरित्याहुः वस्तुतोयादृशसाध्याभाववृत्तिसाध्यीयप्रतियोगित्वात्तादृशसाध्या
भावाधिकरणनिरूपितवृत्तित्वसामान्याभावस्यविवक्षितत्वात् नचात्यंताभावत्वनिरूपितप्रतियोगितानिवेशोव्यर्थइतिवाच्यं।तद्विव
क्षाया।अत्रेवतात्पर्यात् घटभिन्नंपटत्वादित्यादावव्याप्तिमाशंक्यसाध्याभाववृत्तिसाध्यीयप्रतियोगित्वतदवच्छेदकत्वान्यतरावच्छे
दकसंबंधेनसाध्याभावाधिकरणंविवक्षितंमथुरानाथेन अत्रकालिकसंबंधेनाभाववतःसंयोगेनाभावेसाध्येगुणत्वादिहेतावव्या॰
प्तिः साध्याभाववृत्तियत्साध्यीयप्रतियोगितावच्छेदकत्वंतदवच्छेदककालिकसंबंधेनसाध्याभावाधिकरणेगुणादौहेतोर्वर्तमानत्वा
त् एवंकालिकसंबंधेनप्रमेयविशिष्टस्यसंयोगेनाभावेसाध्येगुणत्वादौतादात्म्येनघटविशिष्टस्यसंयोगेनाभावेसाध्येघटानधिकर॰ राम
णत्वादौचाव्याप्तिरितिचिन्त्यं।साध्याभाववृत्तिसाध्यीयप्रतियोगितावच्छेदकत्वंभेदत्वंनिरूपितत्वेनविशेषणीयमितिसर्वसामंजस्यं॥ २

नन्वेवं घटभिन्नं कपालत्वादित्यादौ अव्याप्तिरिति चेन्न। साध्याभाववद्वृत्तित्वघटकसाध्याभावपदेन साध्यनिष्ठात्यंताभावत्वनिरूपकप्रतियो
गिताश्रयस्य विवक्षितत्वात्॥ यद्वा साध्यव्यापकस्य साध्यसमव्यापकस्य यस्य कस्यचित्पदार्थस्यात्यंताभावत्वनिरूपकप्रतियोगिताश्र
योयः साध्यतावच्छेदकावच्छिन्नाभावस्तस्य विवक्षणात्। घटभिन्नं कपालत्वादित्यादौ तादृशसाध्याभावश्च न घटः पटभेदेन सह विशेष
णताविशेषसंबंधेन समव्यापको यो घटत्वात्यंताभावस्तत्प्रतियोगितायाघटेभावात्। घटभेदस्य चात्यंताभावत्वनिरूपितप्रतियोगिनघट
त्वेतिघटस्य साध्याभावपदेन संग्रहः इत्थं च समवायरूपतादृशसंबंधेन घटभेदाभावस्य घटस्याधिकरणे कपालत्वस्य वृत्तित्वेपिनाव्याप्तिः
। घटत्वस्यैव तादृशसाध्याभावपदार्थत्वात् समवायरूपतादृशसंबंधेन तदधिकरणे घटे कपालत्वस्यावृत्तेरिति ध्येयं। वस्तुतस्तु यद्वा क
ल्पे धर्मिणो भेदस्य धर्मात्यंताभावत्वं न कल्प्यते एवं भेदाभावस्य प्रतियोगिस्वरूपं न कल्प्यते तदकल्पनेप्ययं घट एतत्वादित्यत्रानाव्
याप्तिः घटभिन्नभेदस्य स्वरूपत्वेन घटभेदात्मकसाध्याभावस्य घटात्मसाध्यीयप्रतियोगितावच्छेदकतया तदवच्छेदकताघटकस्व
रूपसंबंधमादाय लक्षणसंगमनसंभवादिति तत्त्वं। घटभिन्नं कपालत्वादित्यत्रापिनाव्याप्तिः घटभेदाभावस्य घटात्मकत्वादिति ध्येयं साध्या
भाववद्वृत्तित्वमित्यस्य साध्यतावच्छेदकसंबंधावच्छिन्नसाध्याभाववृत्तिसाध्यसामान्यीयप्रतियोगितावच्छेदकसंबंधेन साध्या
भावाधिकरणत्वं यद्वा साध्यतावच्छेदकसंबंधावच्छिन्नसाध्याभाववृत्तिसाध्यसामान्यीयप्रतियोगित्वतदवच्छेदकतान्यतरावच्
छेदकसंबंधेन साध्याभावाधिकरणत्वं विवक्षितं मथुरानाथेन। अत्रोभयकल्पे घटभिन्नं कपालत्वादित्यादावव्याप्तिः साध्याभाववृ
त्तिसाध्यसामान्यीयप्रतियोगितावच्छेदकसमवायेन घटरूपस्य साध्याभावस्याधिकरणे कपाले हेतोर्वृत्तित्वात्॥ प्रमेयसाध्याभाव
स्य घटत्वस्य साध्यसामान्यीयप्रतियोगितावच्छेदकत्वसत्वात्। तदवच्छेदकसमवायेन घटरूपस्य साध्याभावस्याधिकरणे कपाले

म॰टी॰का ३ हेतोर्वृत्तितया चाव्याप्तिः। अथास्मद्गुरुचरणाः स्वावच्छिन्नत्वस्वावच्छिन्ननिरूपकप्रतियोगितावच्छेदकत्वान्यतराश्रयनिरूपितत्वोभ
यसंबंधेन स्वविशिष्टसाध्याभावाधिकरणत्वस्य विवक्षितत्वाद्दोषः घटभिन्नं कपालत्वादित्यत्र कपालनिष्ठसाध्याभावाधिकरणत्वस्य
समवायसंबंधावच्छिन्नत्वेपि समवायसंबंधावच्छिन्नान्यतत्र यद्घटत्वादिनिष्ठमवच्छेदकत्वं तदाश्रयघटत्वनिरूपितत्वाभावान्नो
भयसंबंधेन समवायविशिष्टत्वं एवं तदधिकरणत्वस्य तादात्म्यसंबंधावच्छिन्नान्यतरत्यद्घटनिष्ठप्रतियोगित्वं तदाश्रयनिरूपितत्वेपि
तादात्म्यसंबंधावच्छिन्नत्वाभावान्नोभयसंबंधेन तादात्म्यविशिष्टत्वं किंतु घटनिष्ठाधिकरणत्वमेव तादृशवृत्तित्वस्य हेतौ सत्वान्नाव्याप्ति
रिति स्वनिष्ठात्यंताभावत्वनिरूपकतादृशतादृशप्रतियोगितावच्छेदकान्यतरावच्छेदकसंबंधेन स्वात्मकसाध्याभावाधिकरणयत्तद्वृत्ति
त्वमर्थः॥ तेन घटभिन्नं कपालत्वादित्यादौ नाव्याप्तिरित्यपि कश्चित्। सत्तावान् जातेरित्यादौ हेतुतावच्छेदकसंबंधावच्छिन्नवृत्तित्वाप्रसि
द्ध्याऽव्याप्तिरतो हेतुतावच्छेदकसंबंधावच्छिन्नाधेयत्वीयस्वरूपसंबंधेनाधेयत्वसामान्याभावो विवक्षितो मथुरानाथेन। अत्रेयमनुपपत्तिः
तादृशाविवक्षणे वह्निमान्धूमादित्यादौ शैवालादिनिष्ठतादृशसंबंधावच्छिन्नवृत्तित्वस्य कालिकसंबंधेन धूमे सत्वादव्याप्तिः संभवत्
नीतिनत्परित्यागोनुचित इतिमेवं हेतुतावच्छेदकसंबंधावच्छिन्नहेत्वधिकरणनिरूपिताधेयत्वीयसंबंधेन साध्याभावाधिकरणनिरूपितवृ
त्तित्वसामान्याभावस्य विवक्षितत्वादिति साध्यवद्भिन्नसाध्याभाववद्वृत्तित्वलक्षणे साध्याभाववत्त्वं न विशेषणताविशेषसंबंधेन घटत्वा
भाववान् पटत्वादित्यादावव्याप्तेः। किंतु साध्याभाववद्वृत्तिसाध्यसामान्यीयप्रतियोगितावच्छेदकसंबंधेनाभाववत्त्वं विवक्षणीयं वह्निमान्धू
मादित्यादौ विशेषणताविशेषसंबंधेन प्रतियोगिताको वन्ह्यभावाभावो वन्हिस्वरूप एव तन्निरूपितवन्ह्यभावनिष्ठप्रतियोगितावच्छेदकसं राम॰
बंधश्च विशेषणताविशेष एव नाव्याप्तिः सामान्यपदोपादानात्समवायेन प्रमेयसाध्यकसत्ताहेतुकस्थले समवायसंबंधावच्छिन्नप्रतियो ३

गिताकप्रमेयाभावस्यपः कालिकसंबंधावच्छिन्नप्रतियोगिताकाभावस्यप्रमेयत्वेनसाध्यांतर्गततयातन्निरूपितसाध्याभाववृत्तिसाध्यी
यप्रतियोगितावच्छेदकसंबंधावच्छिन्नसाध्याभाववति हेतोर्वृत्तित्वेपिनक्षतिः ननुसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकप्रमे
यस्याभावोलाघवेनसत्तास्वरूपंकल्पते तन्निरूपितप्रतियोगितानसाध्यसामान्यनिरूपितेतिसाध्याभाववृत्तिसाध्यसामान्यीयप्रतियोगित्वा
प्रसिद्धिरितिचेन्न साध्यतावच्छेदकसंबंधेनवर्त्तमानयत्किंचित्साध्यनिरूपितस्वनिष्ठप्रतियोगितावच्छेदकसंबंधेनसाध्याभाववत्वंविव
क्षितंतेनसमवायसंबंधावच्छिन्नप्रतियोगिताकप्रमेयाभावाभावस्यसत्तास्वरूपत्वेपिनक्षतिः नचसमवायसंबंधावच्छिन्नप्रमेयसामा
न्याभावस्यविनिगमनाविरहेणप्रमेयसामान्यस्वरूपत्वंकल्पतेतिवाच्यं। सत्तास्वरूपकल्पनावश्यकत्वेइतरस्वरूपकल्पनानावश्यकत्वा
त्। नचैवंकालिकसंबंधेनप्रमेयसाध्यकेकालिकत्वादिहेतावव्याप्तिः। कालिकसंबंधावच्छिन्नप्रमेयाभावस्ययः कालिकसंबंधावच्छिन्ना
भावस्तस्यस्वाभावात्मकस्यप्रमेयत्वेनसाध्यस्यप्रतियोगितावच्छेदककालिकसंबंधेनकालिकसंबंधावच्छिन्नप्रतियोगिताकप्रमेयाभा
वाधिकरणेहेतोर्वृत्तेरितिवाच्यं तादृशप्रतियोगितावच्छेदकयत्संबंधेनसाध्यवद्भिन्नवृत्तित्वमभावस्यतत्संबंधेनसाध्याभाववत्वंनिवे
शनीयमित्येकोनिष्कर्षोगदाधरेण। तत्रेदंसमाधानंयत्रविशेषणतयाघटादृत्तीनांविशेषणताविशेषेणसाध्यत्वेघटत्वाभावश्चहेतुस्तत्राव्या
प्तिर्विशेषणताविशेषसंबंधावच्छिन्नघटावृत्त्यभावस्ययः कालिकसंबंधावच्छिन्नाभावस्तस्याविशेषणतयाघटावृत्तितयासाध्यांतर्गतत
यातत्प्रतियोगितावच्छेदकीभूतघटात्मकसाध्यवद्भिन्नवृत्तितावच्छेदकीभूतकालिकसंबंधेनविशेषणताविशेषसंबंधावच्छिन्नप्रति
योगिताकघटावृत्त्यभावात्मकसाध्याभाववतिपटादौघटत्वाभावस्यवृत्तिरितिनिष्कर्षः॥५॥ साध्याभाववदवृत्तित्वलक्षणेसाध्याभावव
दवृत्तित्वाभावोपुत्रेतिबहुव्रीहिसमासादेवतादृशाधिकरणलाभाद्वृत्तिपदोत्तरंमत्वर्थीयप्रत्ययोनभवतुमर्हतीतिदोषाद्घटनंप्राचीनमते

म·टी·क न्कर्मधारयान्मत्वर्थीयोएवबहुव्रीहिरित्यादिनामथुरानाथेनकृतं अत्रेयमाशंका ननुतदुत्तरंवस्तुतस्तु इत्यादिकल्पेपिसाध्यस्याभावः
४ साध्याभावःसयत्रास्तिअसौसाध्याभाववानित्यत्रसाध्याभावोयत्रेतिबहुव्रीहिणातादृशार्थलाभसंभवात्कथंसाध्याभावपदोत्तरंमत्वर्थी
यः नचाभावोयत्रास्तिअसावभाववान् तदुत्तरंसाध्याभाववानितिषष्ठीतत्पुरुषाश्रयणान्नदोषइतिवाच्यं नसापेक्षेकृतद्धितसमासा
इत्यनेनैवविरोधादितिचेदुच्यते यत्रमत्वर्थीयप्रत्ययेनयद्यदर्थः प्रत्याय्यतेतत्रयदिबहुव्रीहिणातत्तदर्थःप्रत्याय्यतेतदैवतादृशव्युत्प
त्तिरादरणीयाइतिनसर्वत्र अत्रतुतादृशप्रत्ययस्ययथाधिकरणार्थतातथाप्रशंसार्थकताचप्रशंसाचात्राभावनिष्ठसाध्यतावच्छेदका
वच्छिन्नप्रतियोगिताकत्वंतयाचबहुव्रीहिणाधिकरणत्वलाभेपितादृशार्थलाभसंभवः। नचप्राचीनमतेपिअवृत्तपदोत्तरंमत्वर्थीयप्रत्य
यस्यवृत्तित्वावच्छिन्नप्रतियोगिताकत्वरूपाभावनिष्ठप्रशंसाबोधकत्वसंभवान्नदोषइतिवाच्यं तत्रनञ्पदस्यैवान्वयितावच्छेदकः
धर्मावच्छिन्नप्रतियोगिताकाभा वत्वविशिष्टबोधकत्वात् नञ्पदस्यतादृशव्युत्पत्तिस्वीकारे पुनर्घटवत्यपिघटोनास्तीतिप्रत्ययापः
त्तिस्तत्रघटनिष्ठप्रतियोगिताकाभावसत्वात् नचसाध्याभाववानित्यत्राभावपदादेवतादृशार्थलाभःसंभवतीतिवाच्यं। अभावपदस्य
तादृशार्थबोधकत्वात्। एतदेव दीधितौसाकल्यघटितलक्षणेसाध्याभावपदेनसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभावोवि
वक्षितः। अन्यथातत्रसाध्याभावपदेनैवतादृशार्थलाभसंभवाद्विवक्षया असिद्धत्वापत्तिरितिध्येयंसाध्यवह्निनेतिसाध्याभावेसाध्य
तावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकत्वनिवेशेह्रदादिवृत्तिसमवायावच्छिन्नवन्ह्यभाववत्पर्वतादेर्वृत्तेरसंभवस्यकालिकसं
बंधेनसमवायावच्छिन्नद्रव्यताभावस्यसाध्यत्वेकालत्वादौहेतौसाध्यवह्निन्नपरमाणुगगनादिवृत्तिदैशिकविशेषणताविशेषाव राम
च्छिन्नसाध्याभावात्मकद्रव्यत्वादौहेत्वधिकरणवृत्तित्वेनाव्याप्तेरप्रसंगादिति ग दाधरी ननुसाध्याभावाधिकरणतायांसाध्यताव ४

च्छेदकसंबंधेनसाध्यवत्ताबुद्धिविषयविधयाप्रतिबंधकतावच्छेदकसंबंधावच्छिन्नत्वस्यावश्यंनिवेशनीयतयाताहशसंबंधश्चविशे
षणताविशेषस्यकालिकसंबंधेनद्रव्यत्वाभाववत्ताबुद्धिंप्रतिदैशिकविशेषणताविशेषसंबंधेनकालिकसंबंधावच्छिन्नप्रतियोगिताकद्रव्य
त्वाभावप्रकारकज्ञानस्यबाधनिश्चयविधयाप्रतिबंधकत्वात्।तथाच द्रव्यत्वस्वरूपाभावाधिकरणाप्रसिद्धेर्वताहशसाध्याभावमादाय
व्याप्तिरसंभवाद्व्याप्तेरसंगतिरितिचेन्नताहशाभावस्यातिरिक्तत्वमभ्युपेत्यव्यावृत्तिदत्तातन्नभद्रं॥ ॥ननुवन्हिमान्धूमादित्यादौसाध्याभा
वाधिकरणधूमाधिकरणतानिरूपितवृत्तित्वस्य हेतौसत्वात्।अव्याप्तिरितिचेन्नस्वनिरूपितत्वस्वनिष्ठाधिकरणतानिरूपितत्वोभयसंबंधेन
साध्याभावाधिकरणविशिष्टस्यवृत्तितायांनिवेशान्नदोषइतिध्येयं॥८समाप्तेयं॥ साध्याभाववदवृत्तित्वलक्षणे ननुवन्हिमान्धूमादित्यादा
वव्याप्तिःसाध्याभावा धिकरणीभूतधूमाधिकरणतानिरूपितवृत्तित्वंधूमेसत्वात्।वृत्तितायामधिकरणनिरूपितत्वस्यैवाधिकरणतानि
रूपितत्वस्यापिस्वीकारात्।साध्याभावाधिकरणतानिरूपितवृत्तित्वाभावविवक्षणे धूमवान्वन्हेरित्यादावतिव्याप्तेः।नचसाध्याभावा
धिकरणनिष्ठाधिकरणतानिरूपितवृत्तित्वस्यहेतौसत्वात्।नचहेत्वधिकरणताभिन्नत्वंसाध्याभावाधिकरणविवक्षणीयमित्यदोषः इ
तिवाच्यम्।धूमाधिकरणताभिन्नधूमादित्यादावव्याप्तेः हेत्वधिकरणताभिन्नसाध्याभावाधिकरणाप्रसिद्धिरितिचेन्न।स्वनिरूपितत्व
स्वनिष्ठाधिकरणतानिरूपितत्वोभयसंबंधेनस्वविशिष्टयद्वृत्तित्वंतद्वृत्तित्वस्यविवक्षितत्वात्दोषासंभवात् स्वप्रकृतसाध्याभा
वाधिकरणंयद्यपिअवच्छेदकताभिन्नंअवच्छेदकत्वान्यत्वविशिष्टप्रमेयत्वादित्यादावव्याप्तिः साध्याभावाधिकरणंयदवच्छेदक
त्वंतन्निरूपितत्वस्यहेतुनिष्ठाधेयतायांसत्वात्।आधेयतायांआधेयतावच्छेदकतानिरूपितत्वात्।एवंताहशावच्छेदकत्वनिष्ठंय
दधिकरणत्वनिरूपितत्वस्यचसत्तावच्छेदकत्वान्यत्वविशिष्टहेतौअवच्छेदकतानिष्ठाधिकरणतावृत्तित्वा दितिनिरुक्तोभयसंबं

म·टि धेनसाध्याभावाधिकरणीभूतावच्छेदकताविशिष्टवृत्तित्वस्यहेतौसत्त्वादित्युच्यते।तदास्वनिरूपितत्वपदेनस्वनिष्ठावच्छेदकतात्वावच्छिन्ननिरूपकता
का·शं निरूपितत्वस्यविवक्षणीयतयावारणसंभवादितिध्येयं।अथसाध्याभावनिरूपिताभावोविवक्ष्यतां।किमाधेयतानिवेशेचेतिचेन्न।वन्हिमान्धूमादित्यत्रा॰
५ व्याप्तेः साध्याभावधूमाभावस्तन्निरूपितप्रतियोगिताया हेतौसत्वात्।नचनिरुक्तोभयसंबंधेनसाध्याभावाधिकरणविशिष्टाभावविवक्षणेनैषदोषइतिवाच्यं
।वन्हिमान्धूमाधिकरणत्वादित्यादावव्याप्तेः।साध्याभावाधिकरणह्रदतन्निष्ठाधिकरणत्वएतदन्यतरत्वस्याभावस्यएतदन्यतमस्वरूपतयातन्निरूपितस्य
प्रतियोगित्वस्यहेतौसत्वादितिध्येयं।नव्यास्तुधूमाभाववान्धूमाधिकरणत्ववह्निमत्वादित्यादावव्याप्तिः।धूमाधिकरणतावद्भेदाभावस्यप्रतियोगिताव॰
च्छेदकोभयस्वरूपतयास्वनिरूपितत्वस्वनिष्ठाधिकरणतानिरूपितत्वोभयसंबंधेनस्वविशिष्टवत्वस्यहेतौसत्वादित्याहुः।ननुसाध्यतावच्छेदकसं
बंधावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकवृत्तिसाध्यसामान्यीयप्रतियोगितावच्छेदकसंबंधेनसाध्याभावाधिकरणत्वंनिवेश्यतां
किमभावनिवेशेचेतिचेन्न।कालिकसंबंधावच्छिन्नप्रतियोगिताकविषयित्वसामान्याभावस्यविषयितयासंबंधेनसाध्यत्वेतज्ज्ञानत्वेहेतावव्या
प्तेः तथाहि तत्रविषयित्वसंबंधप्रतियोगित्वस्यविषयित्वसंबंधावच्छिन्नाधेयत्वस्यानतिरिक्तत्वमतेसंसर्गविधयाविषयितासंबंधप्रतियोगिता
पिसाध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकावच्छिन्नेतितादृशप्रतियोगिताकेविषयित्वेसाध्यसामान्यीयकालिकसंबंधावच्छिन्नप्रति
योगितास्तीतितदवच्छेदककालिकसंबंधेनसाध्याभाववतितज्ज्ञानेहेतोर्वृत्तेरतस्तन्निवेशः।नचतथापितत्राव्याप्तिरेवाभावाभावविधयातत्राप्यभाव
त्वस्यसत्वादितिवाच्यं।तादृशप्रतियोगितानिरूपितानुयोगितावतोनिवेशात्।नचतथापिकालिकसंबंधावच्छिन्नप्रमेयाभावस्यकालिकसाध्यतायां
कालत्वेहेतावव्याप्तिः।कालिकसंबंधावच्छिन्नप्रतियोगिताकप्रकृतसाध्याभावस्यातिरिक्तत्वेपियत्किंचित्प्रमेयस्वरूपतयातन्निष्ठापिसाध्यसामान्यीयकालिकसंबं राम·
धावच्छिन्नप्रतियोगितेतितदवच्छेदककालिकसंबंधेनसाध्याभाववतिहेतोर्वृत्तेरतस्तद्वारणायसाध्याभावनिष्ठत्वपदेनसाध्याभावत्वव्याप्यत्वंभवतावश्यंवक्तव्यंतथाचोक्त ५

स्थलेकालिकसंबंधावच्छिन्नसाध्यीयप्रतियोगिता साध्यनिष्ठापि न साध्याभाववत्त्वव्याप्येति न दोषः। एवं च कालिकसंबंधावच्छिन्नविष
यित्वाभावस्य विषयितासंबंधेन साध्यतामपि तादृशप्रतियोगिताकत्वव्याप्यत्वनिवेशेनैव न दोषः किमभावनिवेशेनेति वाच्यं कालि
कसंबंधावच्छिन्नप्रतियोगिताकप्रमेयाभावस्य स्वरूपसंबंधेन साध्यत्वे आत्मत्वहेतावव्याप्तेः। तथाहि कालिकसंबंधावच्छिन्नप्रति
योगिताकोयः प्रकृतसाध्याभावस्तदभावस्यासाध्यस्वरूपतया तन्निष्ठा या साध्यसामान्यीय — स्वरूपसंबंधावच्छिन्नप्रतियोगिता सा
पि साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकयावत्प्रमेयरूपसाध्याभाववत्त्वव्याप्येति तदवच्छे
दकस्वरूपसंबंधेन साध्याभाववत्यात्मनि हेतौ वृत्तेरिति न च साध्याभाववत्त्वसमनियतत्वं निवेश्यतामिति न दोष इति वाच्यं। कालि
कसंबंधावच्छिन्नप्रमेयाभावस्य कालिकेन योभावस्तस्य स्वरूपसंबंधेन साध्यत्वे हेतावव्याप्तिः। कालिकसंबंधावच्छिन्नप्रमेयत्वा
वच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्ना या स्वरूपसंबंधावच्छिन्नप्रतियोगिता सापि साध्याभावसमनियता प्रमेयात्मकसाध्य
सामान्यनिरूपिता चेति। तदवच्छेदकस्वरूपसंबंधमादाय साध्याभाववति हेतौ वृत्तेरिति वाच्यं। साध्याभावनिष्ठत्वपदेन साध्याभाव
त्वावच्छिन्नत्वस्य विवक्षितत्वान्न कोपि दोषः। न च तादृशप्रतियोगिताकत्वावच्छिन्नत्वनिवेशेनैव सकलदोषनिरासे किमभावनिवे
शेनेति वाच्यं। कालिकसंबंधावच्छिन्नप्रतियोगिताकप्रमेयाभावस्य स्वसमानकालिनकालिकसंबंधावच्छिन्नप्रतियोगिताकप्रमे
याभाववत्तासंबंधेन साध्यत्वे कालत्वहेतावव्याप्तेः। तत्प्रतियोगिता तत्संबंधावच्छिन्नाधेयत्वस्यैक्यमते संसर्गविधया साध्यता
वच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वं यावत्प्रमेयेस्ति। तथा च समनियताभावयोरैक्यमते नि
रुक्तसंसर्गविधया साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वं प्रमेये नास्तीति प्रतीति

म· टी· सिद्धाभावस्यसाध्यनिरूपतयासंसर्गविधयासाध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगितायाअपि
का· ६ साध्यसामान्यीयतयाधर्तुंशक्यतयातादृशप्रतियोगितावच्छेदकसंबंधेनसाध्याभाववतिकालेहेतौ वृत्तेःसाध्याभावत्वावच्छि
न्नत्वनिवेशेनिरुक्तप्रतियोगिताकत्ववत्त्वमेयत्वावच्छिन्नप्रतियोगितायातादृशाभावत्वेनधर्तुमशक्यतयानकोपिदोषइतिवि
भावनीयंसुधिभिः॥ ॥इतिमाथुरीपंचलक्षणीटिप्पणंकालीशंकरीसमाप्ता॥ ॥वाराणसीप्रसादस्यनियोगेनप्रयत्नतः॥काशी
संस्कृतमुद्रायामंकितोयंशिलाक्षरैः॥१॥श्रीकाशीजीमेज्ञानवापीकेपूर्वफाटकपरश्रीविश्वनाथजीकेपासश्री३युतमहाराजशिवलाल
दुबेजीकेमकानमेछपीजिनकोलेनेकीदरकारहोयउन्होनेइसछापेखानेकेकार्यसम्पादकबाबूवाराणसीप्रसादयाकचौरीगलीमेभाईप्र
तापसिंहजीकेदुकानपरमिलेगी॥मितिज्येष्ठकृष्ण१३बुधवासरेसंवत्१९३१॥ ॥ श्रीगजाननप्रसन्नोस्तु॥ ॥ ॥ ॥

राम· ६